

# श्री महा गणेश पंच रत्नम्-मुदा करात्त मोदकं सदा विमुक्ति

https://www.chalisa.online

|| श्री महा गणेश पंच रत्नम् ||

मुदा करात्त मोदकं सदा विमुक्ति साधकं ।
कलाधरावतंसकं विलासिलोक रक्षकम् ।
अनायकैक नायकं विनाशितेभ दैत्यकं ।
नताशुभाशु नाशकं नमामि तं विनायकम् ॥ 1 ॥
नतेतराति भीकरं नवोदितार्क भास्वरं ।
नमत्सुरारि निर्जरं नताधिकापदुद्ढरम् ।
सुरेश्वरं निधीश्वरं गजेश्वरं गणेश्वरं ।
महेश्वरं तमाश्रये परात्परं निरंतरम् ॥ 2 ॥
समस्त लोक शंकरं निरस्त दैत्य कुंजरं ।
दरेतरोदरं वरं वरेभ वक्त्रमक्षरम् ।
कृपाकरं क्षमाकरं मुदाकरं यशस्करं ।
मनस्करं नमस्कृतां नमस्करोमि भास्वरम् ॥ 3 ॥
अकिंचनार्ति मार्जनं चिरंतनोक्ति भाजनं ।
पुरारि पूर्व नंदनं सुरारि गर्व चर्वणम् ।
प्रपंच नाश भीषणं धनंजयादि भूषणं ।
कपोल दानवारणं भजे पुराण वारणम् ॥ 4 ॥
नितांत कांति दंत कांति मंत कांति कात्मजम् ।
अचिंत्य रूपमंत हीन मंतराय कृंतनम् ।
हृदंतरे निरंतरं वसंतमेव योगिनां ।
तमेकदंतमेव तं विचिंतयामि संततम् ॥ 5 ॥
महागणेश पंचरत्नमादरेण योऽन्वहं ।
प्रजल्पति प्रभातके हृदि स्मरन् गणेश्वरम् ।
अरोगतामदोषतां सुसाहितीं सुपुत्रतां ।
समाहितायु रष्टभूति मभ्युपैति सोऽचिरात् ॥

|| https://www.chalisa.online ||